# परिशिष्टम्

४२२५ पृष्ठस्य पद्मशब्दपरिशिष्टम्

"अष्टकास्तु भवेत् पद्मं तत्र दत्तं तथाऽक्षयम्" हेमा० श्रा० जातूकर्ण्योक्ते १५ अष्टकाश्राद्धे ।

४२२५ पृष्ठस्य पद्मकशब्दपरिशिष्टम्

"यदा विष्टिर्व्यतीपातो भानुवारस्तथैव च । पद्मकं नाम तत्प्रोक्तमयनाच्च चतुर्गुणम्" हेमा० श्रा० शङ्खोक्ते श्राद्धकालभेदे न० ।

४२१४ पृ० पारावतशब्दस्य परिशिष्टम्

सर्वार्थचिन्तामण्युक्ते क्षेत्रहोराद्रेक्काणादिदशवर्गमध्ये येषु केषु चित् षट्सु शुभांशेषु । प्रसङ्गात् क्षेत्रादिदशवर्गनिरूपणेन तत्र द्वित्र्यादिवर्गे एकैकस्य योगे नव विशेषसंज्ञाः तत्फलञ्च तत्रोक्तं प्रदर्श्यते तत्र क्षेत्रशब्दे क्षेत्रपतय उक्ताः द्रेक्काणाद्यधीश्वराः सर्वार्थ० उक्ता यथा "राशिं त्रिधाकृत्य द्रेक्काणनाथास्तदीश१ पुत्रेश२ शुभाधिनाथाः३ । युग्मोन्दुरुग्यौ भवने रवीन्दू नाथौ त्वयुग्मे भवनस्य चार्द्धे । चरेऽंशकानामधिपास्तदंशा राशौ स्थिरे तन्नवमेश्वराद्याः । द्विदेहभे तत्सुतराशिनाथाद्वदन्ति शास्त्रार्थविदो महान्तः । तत् क्षेत्रपा द्वादशभागनाथा लग्नस्य वर्गाधिपतिस्तदीशात् । त्रिंशांशपा भौमशनीज्यसौम्यशुक्रा भवन्त्योजगृहे समे तु । विलोमतः पञ्चशराष्टसप्तबाणाः क्रमादूचुरनेकशास्त्रैः । सप्तांशपास्त्वोजगृहे तदीशाद्युग्मे गृहे सप्तमराशिपात्तु । दशांशपानामधिपास्तदीशादोजे समे तन्नवमेश्वराद्याः । ओजे १५ कलानामधिपास्तदीशास्तुर्त्वौ (अंश) विधु४५हरौ दिनेशः५० । युग्मे क्रमादुत्क्रमयमेव राशौ षष्ट्यंश३०कानामधिपास्त्वयुग्मे । घोरांशको१ राक्षस२ देवभागौ३ कुबेर४ रक्षोगण५ किन्नरांशाः६ । भ्रष्टः७ कुलघ्नो८ गरला९ग्निसंज्ञौ१० मायांशकः११ प्रेतपुरीशभागः१२ । अपां पति१३र्देवगणेशभागः१४ काला१५ऽहिभागा१६वमृतांशु१७चन्द्रौ१८ । मृद्वंशकः१९ कोमल२० पद्मभागौ२१ लक्ष्मीश२२ वागीश२३ दिगम्बरांशाः२४ । देवार्द्रभागौ२५ २६ । कलिनाशभागः२७ क्षितीश्वरांशः२८ कमलाकरांशः २९ । क्रमेण मन्दात्मज३० मृत्यु३१काल३२ दावाग्निघोराऽ३४मय३५ कण्टकाख्य३६ । सुधामृतांशुः३८ परिपूर्णचन्द्र३९ विषप्रदग्धौ४० कलिनाश४१मुख्यौ४२ । वंशक्षयोत्पातककालरूपाः ४३।४४।४५ सौम्य४६श्च मृद्वंश ४७ सुशीतलांशू ४८ । दंष्ट्रा३९ कराले५०न्दुमुख५१प्रवीणाः ५२ कालाग्नि५३दण्डायुध५४निर्मलांशाः५५ । शुभाशुभांशा५६।५७ वतिशीतलांशः५८ सुधापयोधिभ्रमणेन्दुरेखाः५९।६० ज्ञेयाः क्रमादुत्क्रमयमेव युग्मे शुभान्वितांशो यदि शोभनाप्तिः । क्रूराः षष्ट्यंश(३०)गाः सर्वे नाशयन्ति खचारिणः । परिपूर्णबलैर्युक्ता स्वोच्चमूलत्रिकोणगाः । स्वर्क्षकेन्द्रोत्तमांशस्था मित्रक्षेत्रत्रिकोणगाः । सप्तवर्गोद्भवाः स्वांशाः स्वाधिमित्रांशकान्विताः । वर्गास्तु ये दश प्रोक्ताः पूर्वाचार्यैर्महर्षिभिः । भवन्ति वर्गसंयोगे पारिजातादिसंज्ञकाः१० दुःस्थारिनीचमूढस्था ग्रहा बलविवर्जिताः । मरणावस्थगाश्चेत्तु पारिजातादिनाशकाः" । अयं पाठो नादरणीयः । मुख्यपाठस्तु स्वत्र्यंशे स्वनवांशके स्वभवन इति ग्राह्याः।"उत्तमः१ तु त्रिवर्गैक्ये चतुर्वर्गन्तु गोपुरम्२ । वर्गपञ्चकसंयोगे सिंहासन३मिहोच्यते । वर्गद्वयं पारिजातः४षष्ठ्यां पारावतांशकः५ । सप्तमं देवलोकः६स्यादष्टमं च तथा भवेत् । ऐरावतं८ तु नवमं फलं तेषां पृथक् पृथक् । दशवर्गस्य संयोगे विदुर्वैशेषिकांशकान् १० । ऐरावते सार्वभौमः सर्वैश्वर्यसमन्वितः । देवलोके६ महादानकर्त्ता राजा क्षितीश्वरः । पारावते५ मातुलिकः सर्वशास्त्रविशारदः । सिंहासने३ भवेद्भूमिपतिः सर्वैः स्तुतो महान् । गोपुरे२ धनवान्नित्यं सर्वविद्याविशारदः । उत्तमे१ सकला सम्पत् पारिजाते४ धनान्वितः । स्वांशे १० यशस्वी मतिमान् सर्वसौख्यसमन्वितः" ।

४२२८ पृ० पिण्डशब्दपरिशिष्टम् ।

तत्र संहतस्य एकीकृतः यथा "बाणमनूनां तु संपिण्ड्य कालं तत्सन्धिभिः सह" सू० सि० व्याख्याने "संपिण्ड्य एकीकृत्य रङ्गनाथः । संपिण्डं मिश्रितं मिलितं कृत्वेत्यर्थः । तथा च अहर्गणानयने प्रथमपदानां द्वन्द्वमेकत्र कार्यमिति बोध्यम् । केरलशब्दे २२४१ पृ० प्रश्नमनोरमादर्शिते "वर्गवर्णप्रमाणस्तु स्वरं ताडितं मिथः । पिण्डसंज्ञा भवेत् तस्य यथाभागैस्तु कल्पना" इत्युक्ते१पदार्थे च ।

४२२४ पृ० पितृपक्षशब्दपरिशिष्टम्

गौणाश्विनकृष्णपक्षे ४प्रेतपक्षे तच्छब्दे दृश्यम् ।

४२२६ पृष्ठस्य पित्तलशब्दपरिशिष्टम् ।

सुश्रुतोक्ते योनिरोगभेदे स्त्री स्त्रीणां ५योनिरोगा विंशतिविधा उदावर्त्तशब्दे ११६२ पृ० सुश्रुतोक्ता दर्शिताः । तेषां लक्षणान्यत्रोच्यन्ते "सफेनिलमुदावर्त्ता रजःकृच्छ्रेण मुञ्चति । वन्ध्यां नष्टार्त्तवां विद्याद्विप्लुतां१नित्यवेदनाम् । परिप्लुतायां४ भवति ग्राम्यधर्मे रुजा भृशम् । वातला५